व्याकरणपरिचयः

—

दशलकाराः

नीलेश बोडस
neelesh.bodas@gmail.com
24/04/2016
Session recording here

वन्दनम्

येनाक्षरसमाम्नायम् अधिगम्य महेश्वरात्

कृत्स्नं व्याकरणं प्रोक्तं तस्मै पाणिनये नमः ॥

वाक्यकारं वररुचिम् भाष्यकारं पतञ्जलिम्

पाणिनिं सूत्रकारञ्च प्रणतोऽस्मि मुनित्रयम् ॥

पदम्

- वाक्यम् = पदसमूहः ।
- पदम् = सुबन्तम् (नामपदम्) / तिङन्तम् (क्रियापदम्)
- सुप् + अन्तम् = सुबन्तम् । तिङ् + अन्तम् = तिङन्तम् ।
- ये प्रत्ययाः प्रातिपदिकेभ्यः आगच्छन्ति, ते **सुप्-प्रत्ययाः** ।
- प्रातिपदिकम् + सुप्-प्रत्ययः = नामपदम् । यथा - राम + औ = रामौ ।
- ये प्रत्ययाः धातुभ्यः आगच्छन्ति, ते **तिङ्-प्रत्ययाः** ।
- धातुः + तिङ्-प्रत्ययः = क्रियापदम् । यथा - अस् + ति = अस्ति ।

धातुः + तिङ्-प्रत्ययः = क्रियापदम्

धातवः

- प्रायः द्विसहस्रः धातवः (2000)
- विभागद्वयम् - परस्मैपदिनः / आत्मनेपदिनः ।
- ये धातवः उभयोः पदयोः प्रयुज्यन्ते ते उभयपदिनः ।

तिङ्-प्रत्ययाः

- प्रत्येकस्य लकारस्य ; प्रत्येकस्य पदस्य नव तिङ्-प्रत्ययाः ।
- त्रयः पुरुषाः X त्रीणि वचनानि = नव

लकाराः

लकारानां नामानि कथं निर्मितानि ?

ल् + **अ** + ट् = लट्

ल् + **इ** + ट् = लिट्

ल् + **उ** + ट् = लुट्

ल् + **ऋ**+ ट् = लृट्

ल् + **ए** + ट् = लेट्

ल् + **ओ** + ट् = लोट्

ल् + **अ** + ङ् = लङ्

ल् + **इ** + ङ् = लिङ्

ल् + **उ** + ङ् = लुङ्

ल् + **ऋ** + ङ् = लृङ्

लकारनामानि

एतेषां सर्वेषां प्रथमवर्णः "ल्" अस्ति, अतः **लकारः** इति नाम ।

ल्	अ	इ	उ	ऋ	ए	ओ
ट्	लट्	लिट्	लुट्	लृट्	लेट्	लोट्
ङ्	लङ्	लिङ्	लुङ्	लृङ्	-	-

लकाराः - विभागद्वयम्

कालवाचकाः लकाराः	भाववाचकाः लकाराः
कालं निदर्शयन्ति ।	**भावं** निदर्शयन्ति ।
वर्तमानकालः - **लट्**	आज्ञा, प्रार्थना, इच्छा - **लोट्, लिङ्**
भूतकालः - **लिट्, लङ्, लुङ्**	क्रियातिपत्ति - **लृङ्**
भविष्यत्कालः - **लुट्, लृट्**	

लेट्लकारः कालवाचकः अपि अस्ति, भाववाचकः अपि अस्ति ।

वर्तमानकालः - लट्लकारः - प्रत्ययाः, उदाहरणम्

ति	तः	अन्ति
सि	थः	थ
मि	वः	मः

पठति	पठतः	पठन्ति
पठसि	पठथः	पठथ
पठामि	पठावः	पठामः

ते	इते	अन्ते
से	इथे	ध्वे
ए	वहे	महे

लभते	लभेते	लभन्ते
लभसे	लभेथे	लभध्वे
लभे	लभावहे	लभामहे

भविष्यत्कालवाचकः - लृट्लकारः, लुट्लकारः

लृट्लकारः	लुट्लकारः
सामान्यभविष्यत्कालं निदर्शयति	**अनद्यतनभविष्यत्कालं** निदर्शयति

अनद्यतन = न अद्यतन तत् ।

अनद्यतन कार्यं दर्शयितुम् **लुट्लकारः** प्रयुज्यते । यथा - रामः श्वः वनं **गन्ता** ।

रामः श्वः वनं **गमिष्यति** ✗

रामः अद्य रात्रौ वनं **गमिष्यति** ✓

रामः वनं **गमिष्यति**

लृट्लकारः - प्रत्ययाः, उदाहरणम्

स्यति	स्यतः	स्यन्ति
स्यसि	स्यथः	स्यथ
स्यामि	स्यावः	स्यामः

दास्यति	दास्यतः	दास्यन्ति
दास्यसि	दास्यथः	दास्यथ
दास्यामि	दास्यावः	दास्यामः

स्यते	स्येते	स्यन्ते
स्यसे	स्येथे	स्यध्वे
स्ये	स्यावहे	स्यामहे

लप्स्यते	लप्स्येते	लप्स्यन्ते
लप्स्यसे	लप्स्येथे	लप्स्यध्वे
लप्स्ये	लप्स्यावहे	लप्स्यामहे

लुट्लकारः - उदाहरणानि

रामः वनं श्वः गन्ता ।

भवान् अग्रिममासे गीतां पठिता वा?

अहम् परश्वः परीक्षां लेखितास्मि ।

वयम् मङ्गलवासरे मिलित्वा यज्ञं कर्तास्मः ।

त्वं अग्रिमवर्षे कुत्र क्रीडितासि?

यूयम् श्वः परश्वः वा चलचित्रम् द्रष्टास्थ ।

लुट्लकारः
=
"ता"-भविष्यत्कालः

भूतकालवाचकः - लङ्लकारः, लुङ्लकारः, लिट्लकारः

लङ्लकारः	लुङ्लकारः	लिट्लकारः
अनद्यतनभूतकालं निदर्शयति	**सामान्यभूतकालं** निदर्शयति	**परोक्षभूतकालं** निदर्शयति

स: अद्य प्रात: मन्दिरम् अगच्छत्

स: अद्य प्रात: मन्दिरम् **अगमत्**

परोक्ष: = अक्ष्ण: पर:

राम: वनं **जगाम**

लङ्लकारः - प्रत्ययाः, उदाहरणम्

त्	ताम्	अन्
स्	तम्	त
अम्	व	म

अपठत्	अपठताम्	अपठन्
अपठः	अपठतम्	अपठत
अपठम्	अपठाव	अपठाम

त	इताम्	अन्त
थाः	इथाम्	ध्वम्
इ	वहि	महि

अलभत	अलभेताम्	अलभन्त
अलभथाः	अलभेथाम्	अलभध्वम्
अलभे	अलभावहि	अलभामहि

लुङ्लकारः , लिट्लकारः - उदाहरणानि

सः वनं अगमत्	सः वनं जगाम
भवान् किं अकार्षीत् ?	भवान् किं चकार ?
छात्रः पाठम् अपाठीत्	छात्रः पाठम् पपाठ
प्रातः सूर्योदयः अभूत्	प्रातः सूर्योदयः बभूव
सा उत्तरम् अवादीत्	सा उत्तरम् उवाद
किं कविः काव्यम् अलेखीत्?	किं कविः काव्यम् लिलेख ?

कालवाचका: लकारा: - संक्षेप:

वर्तमानकालवाचक:	भूतकालवाचक:	भविष्यत्कालवाचक:
लट्लकार:	अनद्यतन: - लङ्लकार:	अनद्यतन: - लुट्लकार:
	सामान्य: - लुङ्लकार:	सामान्य: - लृट्लकार:
	परोक्ष: - लिट्लकार:	

लोट्लकारः

आज्ञा -	शिक्षकः छात्रं आज्ञापयति - एतत् पुस्तकं **पठ** ।
प्रश्नः -	छात्रः पृच्छति - किम् अहम् व्याकरणम् **पठानि** ?
प्रार्थना -	पिता आचार्यं वदति - मम पुत्रं **पाठयतु** भवान् ।
आमन्त्रणम् -	रामः वदति - श्वः भवान् मम गृहम् **आगच्छतु** ।
पद्धतिः -	देहलीनगरम् अनेन मार्गेण **गच्छतु** ।
आशीर्वादः -	विजयी **भव** !

लोट्लकारः - प्रत्ययाः, उदाहरणम्

तु	ताम्	अन्तु
-	तम्	त
आनि	आव	आम

पठतु	पठताम्	पठन्तु
पठ	पठतम्	पठत
पठानि	पठाव	पठाम

ताम्	इताम्	अन्ताम्
स्व	इथाम्	ध्वम्
ऐ	आवहै	आमहै

लभताम्	लभेताम्	लभन्ताम्
लभस्व	लभेथाम्	लभध्वम्
लभै	लभावहै	लभामहै

लिङ्लकारः - प्रकारद्वयम्

विधि-लिङ्लकारः	आशीर्-लिङ्लकारः
आज्ञा **प्रश्नः** **प्रार्थना** **आमन्त्रणम्** **पद्धतिः** **आशीर्वादः**	**अप्राप्यस्य इच्छा** - अहं राष्ट्रपतिः **भूयासम्** - मम शत्रुः **म्रियात्** - विष्णुः मह्यम् आशीषः **देयात्** - सा मया सह विवाहं **क्रियात्** - अहं भगवद्गीतां **स्मर्यासम्**

विधिलिङ्लकारः - प्रत्ययाः, उदाहरणम्

इत्	इताम्	इयुः
इः	इतम्	इत
इयम्	इव	इम

पठेत्	पठेताम्	पठेयुः
पठेः	पठेतम्	पठेत
पठेयम्	पठेव	पठेम

ईत	ईयाताम्	ईरन्
ईथाः	ईयाथाम्	ईध्वम्
ईय	ईवहि	ईमहि

लभेत	लभेयाताम्	लभेरन्
लभेथाः	लभेयाथाम्	लभेध्वम्
लभेय	लभेवहि	लभेमहि

लृङ्लकारः - क्रियातिपत्तिः

यदि वर्षा **अभविष्यत्**, तर्हि सस्यानि **अवर्धिष्यन्त** ।

यदि कृष्णः गीतां न **अवदिष्यत्**, तर्हि अर्जुनः न **अयोत्स्यत** ।

यदि कैकयी वरं न **अप्राक्षीत्**, तर्हि रामः वनं न **अगमिष्यत्** ।

अहम् अध्ययनं **अकरिष्यम्** चेत् परीक्षाम् अपि **अलेखिष्यम्** ।

अभिमन्युः चक्रव्यूहं सम्यक् **अज्ञास्यत्** चेत् सः कौरवेभ्यः न **पराजेष्यत** ।

लेट्लकार:

लेट्लकार: केवलं **वेदेषु** प्रयुज्यते । लौकिकसंस्कृते अस्य लकारस्य प्रयोग: **न भवति** ।

वेदेषु अयं लकार: **भिन्नेषु अर्थेषु** प्रयुज्यते - वर्तमानकाल:, आज्ञा, विधि: आदय: ।

उदाहरणानि -

नेता इन्द्रो नेषत् ।

विद्युत् पताति।

प्रजापति: उदधिं च्यावयाति ।

"पठ्" धातोः रूपाणि

लट्	पठति
लिट्	पपाठ
लुट्	पठिता
लृट्	पठिष्यति
लोट्	पठतु

लङ्	अपठत्
विधिलिङ्	पठेत्
आशीर्लिङ्	पठ्यात्
लुङ्	अपाठीत्
लृङ्	अपठिष्यत्

दशलकाराः - कारिका

लट् वर्तमाने लेट् वेदे भूते लुङ्-लङ्-लिटस्तथा ।

विध्याशीषोस्तु लिङ्लोटौ लुट्-लृट्-लृङ्च भविष्यति ॥

अभ्यासः

प्रश्नः - निम्नलिखितेषु गीताश्लोकेषु स्थितानां क्रियापदानां लकारं निदर्शयत ।

1. आचार्यमुपसङ्गम्य राजा वचनमब्रवीत् [1.2]
2. अस्माकं तु विशिष्टा ये तान्निबोध द्विजोत्तम [1.7]
3. सिंहनादं विनद्योच्चैः शङ्खं दध्मौ प्रतापवान् [1.12]
4. नभश्च पृथिवीं चैव तुमुलो व्यनुनादयन् [1.19]
5. यावदेतान्निरिक्षेऽहं योद्धुकामानवस्थितान् [1.22]

अभ्यासः

6. उवाच पार्थ पश्यैतान् समन्वेतान्कुरूनिति [1.25]

7. धार्तराष्ट्राः रणे हन्युः तन्मे क्षेमतरं भवेत् [1.46]

8. क्लैब्यं मा स्म गमः पार्थ नैतत्त्वय्युपपद्यते [2.3]

9. इषुभिः प्रतियोत्स्यामि पूजार्हावरिसूदन [2.4]

10. भुञ्जीय भोगान् रुधिरप्रदिग्धान् [2.5]

11. न योत्स्य इति गोविन्दम् उक्त्वा तूष्णीं बभूव ह [2.9]

समर्पणम्

अज्ञानतिमिरान्धस्य ज्ञानाञ्जनशलाकया ।
चक्षुरुन्मिलितं येन तस्मै पाणिनये नमः ॥

सर्वे भवन्तु सुखिनः
सर्वे सन्तु निरामयाः ।
सर्वे भद्राणि पश्यन्तु
मा कश्चित् दुःखभाक् भवेत् ॥